Ind L
1501
14

# ŚRINGÁRA TILAKA.

BY

ŚRÌ KÁLIDÁSA,

WITH A COMMENTARY,

BY

KAVIRÁJ CHANDRA MAJUMDÁRA.

EDITED BY

KAYLÁS CHANDRA SÉN GUPTA,

AT THE REQUEST OF

BÁBU BHUVANA CHANDRA VASÁKA.

CALCUTTA:

PRINTED & PUBLISHED BY

BÁBU BHUVANA CHANDRA VASÁKA.
At the sangbàda Jnànaratnàkara Press.
No. 8 Nimtollah Ghat Street.

1871.

Ind L 1501.14

VE RI TAS

Harvard College
Library

THE BEQUEST OF

Charles R. Lanman

PROFESSOR OF SANSKRIT
1880–1926

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

# शृङ्गारतिलकम्।

## महाकविकालिदासविरचितम्।

वैद्यमहामहोपाध्याय श्रीमत्कविराजचन्द्र मजुमदार
प्रणीतयाशान्तिप्रदटीकया समेतम्।

श्रीयुक्तभुवनचन्द्रवसाकमहोदयस्यानुरोधेन
श्रीकैलासचन्द्रसेनगुप्तेन परिशोधितम्।

कलिकातायाम्

त्रिनवत्यधिकसप्तदशशतशाकीय सौराषाढस्य
पञ्चदशदिवसे

श्रीयुतभुवनचन्द्रवसाकमहोदयस्य प्रार्थनया
तद्द्वारैव संवादज्ञानरत्नाकरयन्त्रालये
मुद्रितम्।

( निमतला घाट ष्ट्रीट ८ संख्यक भवन )

Digitized by Google

# विज्ञप्तिरियम् ।

महाकुलसम्पन्नभिषग्वृन्दवन्दितकुलविष्णुदास-कुलसम्भूतः कविवत् कविकुलावतंसोऽनन्यसाधारण धीविद्यासाध्योत्तरराघवपाण्डवीयादिग्रन्थप्रणयनैः क्षितितले लब्धैकविमलयशाः कवीन्द्रवरः श्रीमत्कविराजचन्द्रो महाकविगणाग्रगण्यश्रीमत्कालिदासविरचितद्वाविंशतिश्लोकसम्पूर्णशृङ्गारतिलकनामग्रन्थस्य सर्व्वजनविज्ञातशृङ्गाररसविपरीतशान्तिरसव्याख्यायिनीं घोरसंसारपाशमोचने चैकसाधनशान्तिरसाकृष्टमनसां विदुषां सान्त्वोल्लासिनीं टीकां प्रणीतवान् । सटीकरघुवंशादिमहाकाव्यमुद्राङ्कयद्भिः सूरिभिर्ग्रन्थस्य क्षुद्रकायत्वादलाभाद्वा शान्तिपक्षटीकया शृङ्गारतिलकं न मुद्रितम् । अधुना तदर्थकौशलरसोत्तमतोषितमनस आयुर्व्वेदादि विविधसंस्कृतग्रन्थ मुद्राङ्कणप्रभूतयशसो देशभावुक भावनैकनिश्चयस्य तन्मुद्राङ्कणोत्सुकस्य श्रीयुक्तभुवनचन्द्रवसाकमहोदयस्यानुरोधेन मया यथासाध्यं परिशोधितम् ।

अजानतो मेऽनवधानतो वा शुद्धेषु योऽस्यत्र न शोधनीयः ।
वर्णादिदोषः कृतिभिर्ज्ञतास्ते र्यथासवर्णस्य हि दोषहारैः ॥

काशीयानी निवासिनः ।

श्रीकैलासचन्द्र सेनगुप्तस्य ।

Digitized by Google

Ind L 1501.14

HARVARD
UNIVERSITY
LIBRARY

Digitized by Google

दुर्गायै नमः ।

# अथ शृङ्गारतिलकम् ।

**बाहू द्वौ च मृणालमास्यकमलं लावण्यलीला-जलं श्रोणीतीर्थशिला च नेत्रसफरं धम्मिल्लशैवालकम् । कान्तायाः स्तनचक्रवाक-**

यदङ्घ्रिवारिजरजः परमाणोरनुग्रहात् । नश्यत्यज्ञानतिमिरं तं वन्दे गुरुमव्ययम् ॥ श्रीकालिदासेन कवीन्द्रवृन्द शिरोवतंसेन कृतेष्वमीषु । श्लोकेषु मौद्गल्यकुलप्रसूत स्तनोति टीकां कविराजचन्द्रः । सर्व्वेऽत्र शृङ्गाररसस्य पक्षं पश्यन्ति शान्तस्य तु वेत्ति कश्चित् । प्रच्छन्नभूतं सुतरां यथास्मिन् देहे निविष्टं परमं पुमांसम् । सम्प्रदायविरहादिह चाणा शान्तिपक्षविवृतेर्नकूटता । दृश्यतां समवलम्बतां पुनःकल्पनान्तरमतिं समुच्छ्रताम् ।

इह महाकविश्रीकालिदासःप्रसादवत्तदप्रतिपादितशृङ्गार-रसतिरोहितं काष्ठपुटकादिकरणकस्थगितमणिन्यायेन, शान्तिरसमाहितवान् तादृशशब्दोपन्यासेन च शृङ्गाररसस्यापाततोमधुरत्वं सर्व्वसाधारणत्वञ्च शान्तस्य पुनस्तदतिरेकित्वमभिप्रेतवान् । तत्र प्रथमं शान्तिवर्त्मन्युपदेष्टव्ये कान्तायाः शान्त्यन्तरायभूतत्वात् परिहारमुपदिशति ।

बाह्वित्यादि । हे विदग्धेत्यर्थाद्दग्धानां लोकानां व्याघ्रकानां हतादिवद्दग्धशब्दः चौपविषये यथाप्रयुक्तं भवभूतिना दग्धहृदय कोटयमाकस्मिकस्ते पारिप्लवो विकारइति । कन्दर्प-

युगलं कन्दर्पबाणानलै र्दग्धानामवगाहनाय विधिना रम्यं सरोनिर्म्मितम् ॥१॥

आयाता मधुयामिनी यदिपुनर्नायातएव प्रभुः प्राणायान्तु विभावसौ यदिपुनर्जन्मग्रहं प्रार्थये । व्याधः कोकिलबन्धने

बाणानलैः कामशराग्निभिः करणै र्गाहनाय, आकुलीकरणाय, विधिना निर्म्मितं कान्ताया देहरूपं सरोऽरम्यमरमणीयं, अव, जानीहि । तत्र कदाचिन्नरतिःकार्य्या तन्निर्म्माणस्यपरपीड़नमात्रप्रयोजनकत्वात्तदपि इत्थोऽहोयुक्तः अतो दग्धानामित्युपन्यस्तम् । सरःसाधर्म्म्यमाह बाल्ह इत्यादिना तीर्थशिला अवतार प्राधाणः, धम्मिल्लः संयताःकचा इत्यमरः । अन्यत्सुबोधं, तीर्थं शास्त्राध्वर क्षेत्रोपायनारीरजःसुच । अवतारर्षिजुष्टाम्बु पात्रोपाध्यायमन्त्रिषु, इति मेदिनिः । अत्रावतारोऽर्थः । अवरञ्चे गतौ कान्तौ प्रीतौ तृप्तौ स्मृतौ स्तुतौ । स्वाम्यर्थेऽवगमे कामे सतावविति बोपदेवः ॥ १ ॥

आयातेति । आत्मज्ञानाद्यमस्य निश्चितमरणावश्यम्भावस्य प्राणत्यागायोद्यतस्य कस्यचिदुक्तिरियम् । यामिनी कालरात्रिर्मरणकरी; अधु, नविद्यते धुः कम्पनमभिभवो यस्य तादृशं यथास्यात्तथा आयाता आयास्यति स्वल्पनी एतदनन्तरम् आङ्निश्चये आङ् ज्ञाननिश्चयस्मृत्योरिति मेदिनिः । यदिपुनःप्रभुरात्मानयातोनज्ञातः आत्मज्ञानं नोत्पन्नमित्यर्थः । न इत्यतः आः पीड़ायां, आस्तुस्यातकोपपीड़योरित्यमरः । तदाप्राणा विभावसौ वह्नौ यान्तु, अग्निरेव प्रवेष्टव्य इत्यर्थः । अहं पुनर्जन्मग्रहं न प्रार्थये इत्यतोऽशब्दोनञर्थःप्रत्येतव्यः, अशब्दःस्यादभावेपि स्वल्पार्थे प्रतिषेधयोरिति मेदिनिः । यदिशब्दो गर्हायां

हिमकरध्वंसे च राहुग्रहः कन्दर्पैहर-
नेत्रदीधितिरहं प्राणेश्वरे मन्मथः ॥ २ ॥
इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन
दन्तमधरं नवपल्लवेन । अङ्गानि चम्पक-
दलैः स विधाय वेधाः, कान्ते कथं घटित-
वानुपलेन चेतः ॥ ३ ॥

यदि गर्हाविकल्पयोरिति कोषः । नानारूपेण सकलसंघातुकत्वं बोधयितुं कालरात्रिं विभिनष्टि व्याधः कोकिलबन्धने इत्यादि तस्यास्तत्त्वनिरूपणाय पुनर्विभिनष्टि इमन्मथः प्राणेश्वरेति इः कामस्तस्य मदं मथ्नाति स क्विप् तस्य शिवस्य प्राणेश्वरास्त्री शिवस्य हृदम्भोजस्थिता संहाररूपिणीति, तोऽईलतन्त्रे, ईश्वरेति ईशेर्वरप्रत्ययान्तादाप्रत्ययः ईप्रत्ययस्तौणादिकवरट्प्रत्ययान्तादिति ॥ २ ॥

इन्दीति । नरीनयनादौ नीलोत्पलादिभ्रमशालिनां रागिणां मोहं निरसितुं कारणोपन्यासद्वाराजुगुप्सितत्वं प्रतिपाद्यमोहकारणमप्युल्लिखति । वेधाः स्रष्टा उ भोः नयनम् इन्दीवरेण न घटितवान् मुखं नाम्बुजेन दन्तं न कुन्देन अधरं न पल्लवेन अङ्गानि न चम्पकदलैः, तर्हि केनेत्याह पलेन मांसेन अत्र पलपदं जुगुप्सितत्वसमवायिसामग्रीसम्भारोपलक्षणं तेन दन्तम् इत्यनेनान्वयः संगच्छते, ननु तदा कथमेवं प्रतिभास इत्याह चेतो मनः कान्ते कथं कान्ताकमनीया इकथा कामकथाऽयस्तताद्दृशं विधाय तत्ता नयनादिकानिन्दीवरादिभिरेव घटितवान् तस्मात्कामानुरागादेव जुगुप्सितेऽपि वस्तुनि रमणीयताप्रतिभासत इति सर्व्वथा कामस्य परित्यागः करणीय इत्युपदेशः । नवपल्लवेनेत्यत्र नवेति-

Digitized by Google

एकोहि खञ्जनवरो नलिनीदलस्थो दृष्टः करोति चतुरङ्गबलाधिपत्यम् । किम्वा करिष्यति भवद्वदनारविन्दे जानामि नो-नयनखञ्जनयुग्ममेतत् ॥ ४ ॥

पदद्वयं नञ्निषेधार्थः वशब्दइवार्थः वरुणो वः समाख्यात इवार्थैचतदव्ययमिति कोषः । पलमुन्मानमांसयोरिति मेदिनिः । इकारः कथ्यते कामइत्येकाक्षरकोषः ॥ २ ॥

एक इति । एकः केवलोमञ्जुरूपः पदार्थः जनवरः जनमुत्पत्तिं वरति निवारयतीत्यच् भवच्छेदक इत्यर्थः इज्ञ आवरणो वा चराादिः । निवरते नित्यं प्रजोपद्रवमित्यस्यैव प्रयोगः नलिनी प्रधानपद्मं सहस्रदलाख्यं तद्दलसमीपकर्णिकान्तर्गतः दृष्टः प्रत्यक्षीकृतश्चेत् खं निरतिशयसुखं करोति ब्रह्मानन्दस्य सर्व्वानन्दातिशयित्वात् नन्वेवं विदुषाभवता मकिं न निरीक्ष्यते, आह-एतन्नयनखञ्जनयुग्मं तं ने आर द्रष्टुं न प्राप । अतो नाहं विन्दे नलभइति आहत्योभयत्रान्वीयते, अभावार्थौटशब्दोवाप्रश्लेष्यः । अभावे नह्यनोनापीत्यमरः । खञ्जनरूपनयनस्य नैसर्गिकलौल्यं ख्यापितं, किंभूतं भवत्, भ्रान्तियुक्तम् । भः पुंसि भार्गव भ्रान्त्योरिति कोषान्तरम् । ज्ञाननयनावलोक्यस्य कुत एतन्नयनावलोक्यत्वं ज्ञाननयनेतन्नयनयोर्वैलक्षण्यं दृष्टान्तेन साधयति । वद कथय अजानां छागानाम् इनो नेता किं तुरङ्गबलाधिपतेः कर्म्म करिष्यति तस्माद्यथा अजपालतुरङ्गपालयोः पशुपालत्वाभेदेऽपि कर्म्मणि महद्वैलक्षण्यं तथैतन्नयनज्ञाननयनयोरपि अवलोकनकारणत्वाभेदेऽपि महद्वैलक्षण्यमिति । आधिपत्यम् इति कर्म्मणि यण्ब्राह्मण्यमित्यादिवत् । खमिन्द्रिये पुरे क्षेत्रे शून्ये

येये खञ्जनमेकमेव कमले पश्यन्ति दैवात् क्वचित् ते सर्व्वे कवयो भवन्ति सुतरां प्रख्यातभूमीभुजः । त्वद्वक्त्राम्बुजनेत्रखञ्जन-

भिन्द्रौ विहायसि । संवेदने देवलोके धर्म्म खपि नपुंसकमिति मेदिनिः । इनः पत्यौ न्रपार्कयोरितिच ॥ ४ ॥

येये इत्यादि । अङ्गरूपियों स्तौति येये कवयो योगपण्डिताः कवय इत्यत्र कतिनइतिप्रायः पाठः एकमेव अङ्गरूपं दैवात् भाग्यात् क्वचित्स्थले गृहे तपोवनेवा पश्यन्ति, ते सर्व्वे सुतरां अतिशयेन प्रख्याता या भूमीस्थानं तत्याख्यं तद्भुजो जायन्ते । भुमीचितौ स्थानमात्रे इति वैजयन्ती । वृत्रकमले सहस्रदलाख्ये किंभूतम् अगं पाणिपादादीन्द्रियरहितं तथाच अपाणिपादोजवनो यहीतेत्यादि तयाजनं जनयतीत्यच् सर्व्वोत्पादकमित्यर्थः । तदीयस्फलिङ्गानामेव जन्तुरूपत्वात् । हे मुग्धे त्रैलोक्यसुन्दरि भगवति येये जनास्त्वयखं चरणरूपमिन्द्रियं पश्यन्ति तथा तदीयमम्बु धावनतोयं पश्यन्ति सेवन्ते धातूनामनेकार्थत्वात् । तेते अत्रजनेजन्मनि कलाः कं सुखं लान्ति सुखिनइत्यर्थः जनयगं जन्मद्वयं नपश्यन्ति एतज्जन्मनैव तेषां जन्मसमाप्तिर्भवतीत्यर्थः । एतेनैहिकपारत्रिकाभिमतसम्पादकत्वम् । अत्राप्यशब्दःप्रश्लेष्यःत्वद्वक्त्रात्वदीयलावकेन सह सोपि तथैवस्यादित्यर्थः इतीदंकिमद्भुतं नाद्भुत मित्यर्थः । तस्मादङ्गावलोकत्वचरणावलोकादिनोस्तुल्यत्वमिति । वक्त्रेति वचनमिह स्तुतिरूपतया परिणमति । अतएवार्थान्तरसंक्रमितवाच्यो ध्वनिरयं लक्षणामूलः प्रयोजनञ्च स्वच्छन्दप्रहृमरत्वप्रतिपादनं तथाच भरतः अविवक्षितवाच्यो य स्तत्रवाक्यं भवेद्ध्वनौ । अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतमिति अत्रैवोदाहृतं काव्यनायकारेण त्वामस्मिवच्मिविदुषां

Digitized by Google

युगं पश्यन्ति येये जनास्तेते मन्मथबाण
जालविकला मुग्धे किमत्यद्भुतम् ॥ ५ ॥
झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते
ग्रहणसमयवेला वर्त्तते शीतरश्मेः। तदिह

समवायोऽवतिष्ठति। आमीयां मतिमादाय स्थितिमत्र विधेहि-तटिति, अत्रवचनाद्युपदेशादिरूपतया परिणमति। एवं किभूतं मन्मथबाणजालवि, मन्मथं कामं बाति हन्ति हिनस्ति वा गतिगन्धनयोः अत्र गन्धनं हिंसा वा तगन्ध अर्द्दन इत्यस्य प्रयोगात् स शिवस्तस्य बाणजालं प्राणजालं व्ययति संवृणोति व्येञ संवरणे क्विपि संवरणं तद्दीर्घमन्त्रमिति दीर्घत्वं नपुंसकत्वञ्चणो ह्रस्वः पञ्चेन्द्रियाणि सोमोऽग्निर्वायुः सत्त्वं रजस्तमः। भूरात्माच मनश्चेति प्राणाः प्रोक्तास्तथो दशेत्यायुर्वेदे इयमत्रागमशास्त्री हृदयावस्थितया भगवत्या भगवान् खलु संहारादिविभुर्यदा साव्यक्तरूपाभूत्तदा तां हृदयाद्बहिर्गतामाकलय्य शिवः शवरूपोऽभूदिति। बाणोति अण प्राणन इत्यतो दैवादिकाद्घञ मूर्द्धन्यन्तोयमिति वोपदेवः रमानाथेनाप्येक इत्यनेन तन्मतमनुगृहीतम् ॥ ५ ॥

झटितीत्यादि। कस्यचिद्योगिनोऽयमुपदेशः। झटिति-शीघ्रम् अशीतरश्मेः अशीता अनलसाः सर्वतो विस्मरा रश्मयोज्योतींषि यस्य तस्य परमब्रह्मणः। यद्वा हे अशीत अनलस रश्मे महाज्योतिःस्वरूपस्य ब्रह्मण इति। तस्य गेहं स्थानं सत्यलोकाख्यं प्रविश कुत्र कान्ते कं शिरस्तत्र अन्तशब्दः स्वरूपे शिरोऽत्र सुमेरोरेव तत्रैव सत्यलोकावस्थानात्। तदुक्तं भगवता शिवेन श्रीनिर्व्वाणतन्त्रे। ज्ञानपद्मस्योर्द्धदेशे सहस्रदलपङ्कजम्। अधोवक्त्रं हि तत्पद्मं सुमेरोर्मूर्ध्नि संस्थितम्। इत्युपक्रम्य-

विमलकान्तिं वीक्ष्य नूनं सराहुर्ग्रसति
तवमुखेन्दुं पूर्णचन्द्रं विहाय॥ ६॥
कस्तूरीवरपत्रभङ्गनिकरो भ्रष्टो न गण्ड-
स्थले नोलुप्तं सखिचन्दनं स्तनतटे धौतं
न नेत्राञ्जनम्। रागो न स्खलित

पद्ममध्ये वीजकोषे भुवनानि चतुर्द्दश। स्थानं बहुविधाकारं सर्व्वदेवस्यचाश्रयम्। तन्मध्ये सत्यलोकश्च महारुद्रस्य कारण-मित्यादि। यद्दिर्भूर्लोकादि षट्के मातिष्ठ कृतवत्याह, इह-वहिस्तवग्रहणसमयवेला वर्त्तते ग्रहणं कालग्रस्तता। तस्य समयो निश्चयः सएव वेलावेष्टनं साऽस्ति भूलोकादिषट्कस्यानि-त्यत्वात् तत् स्थानमप्यनित्यमिति। कथं प्रवेष्टव्यमित्युपाय-मुपदिशति। मुखेन्दुं वीक्ष्य मुखे मुखसमीपे इन्दुर्यस्य तं चन्द्रशे-खरमाराध्य। सत्यलोकस्याविनश्वरत्वमितरेषां तद्व्यतिरेक-श्चोपपादयति समुखेन्दुः शिवोरुद्ररूपेण तद्ब्रह्मणो गेहं विहा-य ग्रसति सर्व्वमित्यर्थः। राहुः पूर्णचन्द्रमिवेति लुप्तोपमा विम-लकान्तिमिति मुखेन्दुविशेषणम्। शीतोऽलसेच बहुवारतरौच हष्टइति धरणिः कंशिरोऽम्बुनोरित्यमरः। ध्वान्तं स्वरूपे नाशे ना-नस्त्रीगेषेऽन्तिके त्रिष्विति मेदिनिः॥ ६॥

कस्तूरीत्यादि। अकृतमानमयागस्य कस्यचिदनुनयोक्ति-रियम्। हे गजेन्द्रमन्दगमने गजेन्द्रं मन्दयतीति गजेन्द्रमन्दः सिंहस्तेन गमनं यस्याः हे सिंहवाहिनि इत्यर्थः। मम स्तनतटे स्तनसमीपे हृदयेऽनाहताख्यसरोजावच्छिन्नमानसयागविषये, तवगण्डस्थले कस्तूर्य्युत्तमचित्रविशेषव्यूहः नभ्रष्टः नदत्तः। किमित्याक्षेपे चन्दनं नोलुप्तं किन्तु विच्छिन्नमेव तदपिनदत्त-

त्वाधरपुटे ताम्बूलसम्बड्डितः किं रुष्टासि
गजेन्द्रमन्दगमने किंवास्मद्दुस्तेपतिः ॥ ७ ॥
समायाते कान्ते कथमपिच कालेनवहुना
कथाभिर्देशानां सखिरजनिरर्द्धं गतवती

मित्यर्थः। त्वाधरपुटे ताम्बूलजनितो रागो नोऽस्माकं सम्बन्धे न किं स्खलितः ताम्बूलमपिनदत्तमित्यर्थः। रुद्दुरिति रागविशेषणम्। तथा नेत्रनायकेन शिवेन सह ते तव अङ्गनं मिलनं नधौतं न चिन्तितं ध्यानोपदृक्तस्थाने शिवेन सार्द्धं तेवसुखारिकापिनध्यातेत्यर्थः। हे सखीति शिवस्येत्यर्थात् यद्वा हृदय विशेषणकेतत् तथाहि सखायमाचष्टे स्टह्लाति वेतीनन्नात् क्विप्। तथाच चेतसो मिथ्याज्ञानैर्प्रयोजितमित्वानुरागवशादेवायमस्माकमनर्थ इति। पति त्वं किं रुष्टासि पतिः सर्व्वेश्वरी पतिः स्त्रियामपि वर्त्तत इति श्रीपतिः अतएवामरेणापि धिन्व्यनिम्न उक्तः न स्खलित इति शषसेष्ववोषपरेषु इत्यादिना विसर्गलोपः ॥ ७ ॥

समायात इत्यादि। प्राग्विविक्तस्य पश्चादसत्सङ्गेन ततोभ्रष्टस्य कस्यचिदनुशयोक्तिं वर्णयति देशानामुपदेष्टृणां कथाभिर्बहुनाकालेन कथमपि कष्टदृष्टप्रकारेण अकान्ते कं सुखं तद्विपरीतमकं तस्य सांसारिकदुःखस्यान्ते मार्गे समायाते संप्राप्ते सखिरजनिरर्द्धं सख्युर्नोहसहायभूतस्य रजस्य मध्यमगुणस्य निरर्द्धं रुधुरद्धौ घञि अर्द्धोऽद्धिस्तस्याभावेन वाहतीयासम्भयोरित्यम्। प्रियतमे पुत्रादौ लीलागतवती नष्टा। ततोऽनन्तरमसत् संसर्गेण यावदहं कलहकुपितास्मि कलहस्य कुत्सितः पिता जनकोऽस्मि, तमःसमुदयात्। तावत् सपत्नीव सपत्नः शत्रु तस्यस्त्रीव इयं प्राचीदिक् प्राचीनादिशा पूर्व्वावस्थाभवत्

ततो यावल्लीलाकलहकुपिताऽस्मि प्रियतमे
सपत्नीव प्राचीदिगियमभवत्तावदरुणा ॥ ८

श्लाघ्यं नीरसकाष्ठताडनशतं श्लाघ्यः प्रच-
ण्डातपः क्लेशः श्लाघ्यतरः सुपङ्कनिचयैः
श्लाघ्योऽतिदाहानलः । यत्कान्ताकुचपा-
र्श्वबाहुलतिका हिल्लोललीलासुखं लब्धं
कुम्भवर त्वया नहि सुखं दुःखैर्विना लभ्यते
॥ ९ ॥

किंभूता अरुणा अरुणयति क्रोधादिना विकृतिजननीत्यर्थः । सुखशीर्षजलेषु कमिति मेदिनीकरः । रजोरेणौ परागे स्यादा-र्त्तवे च गुणान्तर इति जाले । सपत्नीव अर्थाः पादरजो-पमा इत्यस्य प्रयोगः । एतावताप्यसत्संसर्गस्य विवेकभङ्गहेतु-त्वेन सर्व्वथा परिहरणीयत्वमित्यवधेयम् ॥ ८ ॥

श्लाघ्यमित्यादि । हे कुम्भवर कुम्भं कुम्भकं प्राणायामाङ्गं वृणोते अर्जयति यस्तदामन्त्रणं हठ सम्भक्तौ अच् यद्वा कुम्भो वार-स्त्रीकामुकस्तं वरति वारयति । असत्संसर्गहीनेत्यर्थः । कुम्भ-प्रमाणामध्ये वक्ष्यते । यद्यतः कान्तायाः कुचादीनां हिल्लोलस्य दोलनस्य या लीला तद्रूपा या लीला तत्सुखं त्वया नहि लब्धम् । कान्तासंसर्गपरित्यक्तः, अतस्ते नीरसकाष्ठताडनशतं श्लाघ्यं रस-स्याभावो नीरसं तत्काष्ठाङ्गपर्य्ययस्य तस्य भावस्तत्ता तया तस्यां वा कडनशतमुद्यमशतं श्लाघ्यम् । अश् उद्यमे युट्, पङ्क-निचयमदं सकलदुर्गोपलक्षणम् अन्यत् सुबोधम् । ननु कान्तासुख परित्यागपूर्व्वक प्रचण्डातपादिकं ममसहिष्णुतया परत्रापि सुख

किं किं वक्त्रमुपेत्य चुम्बसि बलान्निर्लज्ज-
लज्जा क्व ते वस्त्रान्तं शठ मुञ्च मुञ्च शपथैः
किं धूर्त्तवाग्बन्धनैः। खिन्नाहं तव रात्रि
जागरवशात तामेव याहि प्रियां निर्म्मा-

सुखादनीयमिति, क्लेशानर्थक्यमाशङ्क्य समाधत्ते सुखमित्यादि
दुःखैरैहिकैर्विना सुखं भृशम् अतिशयितं खं शर्म्म न लभ्यते विना-
इत्यतः अकारः प्रश्लेष्यः, तस्मात् क्षणिकैहिकसुखनिरसनेन प्र-
चण्डातपादि यत्किञ्चिद्दुःखं स्वीकृत्यापरत्र निरतिशयसुखस-
म्प्राप्तिरिति। कुतः क्लेशानर्थक्यमिति। काष्ठोत्कर्षे स्थितौ दि-
शीत्यमरः। डिङ्खोलत् कण्ठदोलनइति वोपदेवः। सुपूजायां
भृशार्थे चेति मेदिनिः। खशब्दप्रमाणं प्रागुक्तम् ॥ ९ ॥

किं किमित्यादि। कश्चिद्योगी कञ्चिदुपदिशति। हे निर्ल-
ज्ज ते लज्जा क्वगता। किं किं इत्याक्षेपे वक्त्रमुपेत्य बलादनौचि-
त्यात् चुम्बसि मुखमस्तीति कृत्वैव सकलपदार्थं स्वेच्छया लोकं
लोकं प्रस्तौषि सिद्धान्तानिर्वर्त्तणेन सर्व्वेषां किञ्चित् किञ्चित्
प्रस्ताव चुम्बनं, शपथैः त्रियशिरस्पर्शादिभि मिथ्यानिरसनैः
शठं शाठ्यं मुञ्चत्यज, शठ कैतवे भावे क्विप् धूर्त्तवाचां बन्धनैः
किं छलवागुपन्यासैः किं शपथैः मूर्त्तिरागोप्यते इतिपाठे शाठ्यं
मया नकरिष्यते तत्वामीशपथाः प्रत्ययका इत्युक्तावपि शपथैः किं
शाठ्यस्यमूर्त्तिः स्वरूपमागोप्यते आच्छाद्यते शपथेषु कृतेष्वपि कृतं
शाठ्यं स्वयमेव प्रकाशत इत्यर्थः। अनन्तरं कर्त्तव्यमुपदि-
शति, हन्तानुकम्पादीयावरा श्रेष्ठा ए शिवाय खिन्ना तं दृष्ट्वा व्या-
कुला इत्यर्थः तामहि प्रियां कुलकुण्डलिनीं तं उं शिवस्य अथ
संयोजनेन प्रीणीहि, किं कृत्वा निर्म्मील्य, मल मल्ल धारणे वायु

ल्योज्झित पुष्पदामनिकरे का षट्पदानां रतिः ॥ १० ॥

वाणिज्येन गतः स मे गृहपतिर्वार्त्ताऽपि न श्रूयते प्रातस्तज्जननीप्रसूततनया जामातृ

भारयित्वा इत्यर्थः प्राणायामन्त्रोच्चारणपूर्व्वकवायुसञ्चारणेन तयोः संयोगात् । एतेन मन्त्रचैतन्योपाय उपदिष्टः सा कीदृशी त्रिगुणेषु सत्वादिषु जागरोऽवबोधस्तस्य वश मतति सततं प्राप्नोति अत सातत्यगमने क्विप्, तां कीदृशीम् अवस्थां वस्त्रपदमावर णमात्रोपलक्षणं निरावरणां स्वतन्त्रामित्यर्थः । अथमित्यतोऽनन्तरम् उश्च ति पदद्वयम् । उकारः शङ्करः प्रोक्त इत्येकाक्षरकोषः । तामित्यत ए इति चतुर्थ्यन्तम् आः स्याच्छङ्करवेधसोरिति धरणिः । नित्यं कर्म्मणि तुमोऽप्रयोगिण इति चतुर्थी आधातोरित्यत्र धातुग्रहणस्योपलक्षणत्वाल्लोपे प्रत्ययमात्रं पदं ततः अवेति क्रियापदम् । तयोः प्रीतिरन्यतो न सम्भवतीति साधयितुमाह उज्झितेत्यादि षट्पदानां भृङ्गाणाम् उज्झितपुष्पदामनिकरे उज्झितमलब्ध' पुष्पदामयेन तादृशि समूहे कारतिः प्रीति र्नकापीत्यर्थः यथा मधुरवस्त्वन्तरलाभेऽपि मकरन्दालब्धाभृङ्गाणां न प्रीतिस्तथातयोर्नान्यां व्याप्यप्रीतिरिति । स्तोमौधनिकर व्रात वारसंवात सञ्चयाद्रत्यमरः ॥ १० ॥

वाणिज्येनेत्यादि । कस्यचिज्ज्ञानात्मनःपरामर्शोऽयं सम्ब्दृपतिः स्तृस्य देहरूपस्य पतिर्जीवात्मा वाणिज्येन हेतुना मातृगेहं मातृगर्भरूपंस्थानं गतः भारतभूम्यवनरणस्याभिमतफलसम्पादकत्वसम्भावनात् । प्रातः सृष्टि समये प्रातः पदं सृष्टिकालपरम् । निशापदं क्षयकालपरम् । दिनरात्रोरुदयक्षयकल्पत्वेनोक्तत्वात् । अजोविष्णुःसम्बन्धित्वेन विद्यते यस्याः सा

Digitized by Google

गेहं गता। बालाहन्नवयौवना निशि-
कथं स्थातव्य मस्मद्गृहे साम्प्रतं संप्रतिव
र्त्तते पथिक हे स्थानान्तरे गम्यताम्॥११॥
यामिन्येषा गहनजलदैर्वद्धभीमा
न्धकारा निद्रां यातो गृहपतिरसौ

अज्ञातैष्यवीमाया नजायतइत्यन्यतोऽपिचेतिडःप्रत्ययो वा नित्ये-
त्यर्थः तत्रगतासती अहन् कार्त्तव्य विस्मृतिमुत्पाद्यतं हतवती गत-
स्यमेग्टहपतेरिति षष्ठ्यन्तपाठे हिंसार्थत्वात् कर्म्मणि षष्ठीबोध्या
कीदृशी प्रसूततनया प्रसूर्माता तयेव ततः प्रकटितः नयोनी-
तिर्यया। एतेन मायाचरितमहितं तेन नज्ञायतइति। तथा
वाला वालं मुढं करोतीति इनन्तादच् मोहजननीत्यर्थः मूर्खेऽ-
र्भकेऽपि वालः स्यादित्यमरः। तथा अवयौवनाहृद्गाचिरन्त-
नीत्यर्थः। प्रतिचयामजीर्णतया प्रतिभानान्नवयौवना वा अतो-
ऽस्मत् सकाशात् तज्जननीवाशिज्यजननी वार्त्तापि नश्रूयते
तेनेतिशेषः तत्रावज्ञायतइत्यर्थः निशिचयकाले ग्टहे स्थूलशरीरे
कथं स्थातव्यं तदानीं स्थातुं नशक्यत इत्यर्थः। सामाया अयं
आलापथिकत्मेनिवर्त्तते संप्रतिमेमया कष्टे कं यमं हन्ति यमःविषये
स्थानान्तरे स्थानविशेषे सत्याख्येगम्यतां नीयताम् इनन्तात् पञ्चमी
परमब्रह्मणि लीनीक्रियतामित्यर्थः जयजयजह्यजामजित दोष
ग्टहीत गुणामिति श्रुत्यध्याये अजां मायां जहीति श्रीधरस्वा-
मीव्याचष्टे। कोब्रह्मणि समीरात्मायमदक्षेषु भास्करइत्यादि
मेदिनिः। ते इतिस्थाम्वयेत्यर्थे मयेत्यर्थेच मे इतीतिपुरुषोत्तमः
॥ ११ ॥

यामिनीत्यादि। कश्चिन्मनीषाजीवात्मनः प्रबोधायप्रयतते,
हे गहन जलदस्वरूपैर्दुष्कर्मभिर्बद्ध एषा संसृतिरूपायामिनी

क्लेशितः कर्म्मदुःखी। बालाचाहं मनसिजभयात्प्राप्तगाढ़प्रकम्पा ग्रामश्चौरैरयमुपहतः पान्थनिद्रां जहीहि॥१२॥

इयं व्याधायते बाला भ्रुरस्याः कार्मुकायते। कटाक्षाश्च शरायन्ते मनोमे हरिणायते॥१३

कभ्रातस्खलितोऽसि वैद्यकगृहं किन्त्व

यमसम्बन्धवर्ती भीमा अन्धकारा अन्धयतीयन्धकाराबन्धनालयः कारास्याद्बन्धनालय इत्यमरः। असौ गृहपतिः साक्षिरूपः परमात्मा अनिद्रां जागरणं यातःजागरूकः सकलं पश्यतीत्यर्थः कीदृशः क्लेशितः उत्तप्तः यतः कर्म्मदुःखी कर्म्मणात्वदीयेन दुःखवान्। यद्यपि साक्षिणः पारमार्थिकदुःखं नास्ति तथापि अनुचितदर्शनादागन्तुकं तदिति। अहञ्चबाला मनःसमुत्पन्नभयात् प्राप्तातिशयकम्पा, अयं ग्रामोदेहरूपश्चौरैरिन्द्रियाख्यैरुपहतः। हे पान्थ पथिक निद्रामज्ञानं जहीहित्यज। पान्थेति साक्षेपसम्बोधनं यथाकश्चित् पान्थो गृहस्थस्य चातिद्वयोरुदासीनतामवलम्बते तथा त्वमप्युत्पद्यमानेऽप्यात्मनो दुष्कर्म्मस्वदासीनतामाचरसीति॥ १२॥

इयमित्यादि। कश्चिज्जितेन्द्रियः स्वभावं प्रकटयति। मे मम मनोहरिणा क्षणेन सह हेतुना वा अयते गच्छति अतइयं बालाव्याधवदाचरतीत्यादि स्फुटं बालादीनां घातुकत्वेन न तत्रमे मनः प्रवृत्तिरितिभावः॥ १३॥

कभ्रातरित्यादि। हे भ्रातः क्वचलितः प्रस्थितोऽसि, सआह वैद्यकस्य प्रशस्तवैद्यस्य गृहं प्रतिपुनराह किन्त्वं गृहइति स

शान्तो रुजां किन्नु नास्ति गृहे सखे प्रिय-
तमा सर्वान् गदान् हन्ति या॥ वातश्चेत्
कुचकुम्भमर्दनवशात्पित्तञ्च वक्त्राश्रितात्
श्लेष्मानं विनिहन्ति हन्तसुरतव्यापारके-

आह रुजां शान्तिरिति। प्रष्टाभूयोवदति हे प्रिय हे सखे
तेन वैद्यद्वाराकृतशान्तिरूपेण कर्मणा किं कृतइत्याह तमा-
कालरात्रिरस्ति या सर्वान् हन्ति तस्माद्रोगमात्रशान्त्यापि न
सुखमित्यर्थः। ननु यद्येवं तदा किं विधेयमिति सदाचरित-
मुपदिशति अतः कारणात् चेत् श्वासा सुरतव्यापारके कुत्-
सिते सुरतव्यापारेऽपि आसक्ताः सत् अनात्तपःकरणात् पित्तं
श्लेष्माणं दोषमात्रोपलक्षणमेतत् तज्जन्यान् गदान् वा रोगांश्च
विनिहन्ति तथा कुं पृथ्व्यादि पञ्चभूतञ्च विनिहन्ति पञ्चानामेक-
तमविध्वंसे सर्व्वेषामेव विध्वंसात् निर्व्वाणमासादयतीत्यर्थः। अ-
त्रहेतुगर्भं तपोविशेषणं वक्त्राश्रितात् वक्त्रमुखेऽश्रितं मौचो यस्य
वशीकृत मौचादित्यर्थः। हे कांच सङ्कुचित जड़ेति यावत्।
भं भ्रान्तिं रोगशान्तिप्रयत्नादिरूपां न अर्हसप्राप्नुहि
भ्रान्तिं त्यजेत्यर्थः। अर्दगतौ याचनेच वशादितीन्द्रिय
वशीकरणात् तस्मान्मारणस्यावश्यंभावित्वेन तपसैव सकलोप-
तापशान्तिः कार्य्यानान्ययेति। तमा घृताची रात्रिः स्याद्धा-
करो व.मिनीतमीति रभसः। हाटामहादेवरतात्मात क्रू-
त्यस्यै। प्रयोगः। चेदिति चित संवेदने चुरादिः, दूनोलोपे
प्रत्ययलोपलक्षणेन गुणः। मुक्तिः कैवल्यमिर्व्वाण श्रेयो
निःश्रेयसामृतमिति अमरः। अपीति श्लीड़श्लेषणो भावे किप्

लिश्रमात् ॥ १४ ॥ दृष्टिं देहि पुनर्बाले कमलायतलोचने । श्रूयते हि पुरा लोके विषस्य विषमौषधम् ॥ १५ ॥ अन्तर्गता-मदनवह्निशिखावलीया, सा बाधते कि-मिह चन्दनचर्चितेन । यः कुम्भकार-

नविद्यते लोरामक्रियमेवेति क्रियाविशेषणस्य नपुंसकत्वाद्ह्रस्वः श्रमादिति श्रमु तपसि खेदे चेत्यतो घञ् ॥ १४ ॥

दृष्टिमित्यादि । कश्चिद्भगवतीं संनिवेदयति । हे कमलायतलोचने कमलायाल्लक्ष्म्या आयमागमं तनोति डः तादृशं लोचनं दर्शनं यस्या स्त्वद्दर्शनादेव लक्ष्मीलाभः स्यादिति । बाले शिशौनयि पुनर्दृष्टिं देहि, ननुमद्दर्शनात् कतिदानवा भस्मीभूता स्ततस्तेन किमित्याशङ्क्याह, नवेयं दृष्टि रहिपुरा-लोके, अहीनां क्रूराणां शत्रूणां पुरस्य शरीरस्यालोके विषं श्रूयते श्रुतिवाक्येभ्यः शाब्दबोधविषयीक्रियते, आत्मा श्रोतव्य इति यत् अन्यत्रविषस्यौषधमिति, अतोदृष्टिपातादहं कृतार्थः स्यामितिभावः । बाल इत्यनेन विषश्लेषप्रकाराभेदः प्रति-पादितः। कद्रूर्त्वेऽप्यहिः क्रूरेऽप्यहिः सर्पे स्मृतो बुधैरिति धरणिः। देहे पाटलिपुत्रेच पुरं स्याद्गुग्गुलौपुर इति पुरुषोत्तमः ॥ १५ ॥

अन्तर्गताइत्यादि। कामसुखस्य पारमार्थिकदुःख जनकत्वं साधयितुमाह । हे मदन काम, अन्तर्गता वह्निशिखाज्वलन-ज्वालेव देदीप्यमानत्वात् आलीत्यर्थः । अवलीय लीनीभूय आमास्थिता, अतो दूरं नशक्यतइत्यर्थः। हे बाध हिंसक इहआत्मनि ते तवचन्दनचर्चितेन सुखावयवेन किंम

पवनोपरिपङ्क्लेपस्तापायकेवलमसौ नच तापप्रशान्त्यै ॥१६॥ दृष्ट्वायासां नयनसुषमां वङ्कवाराङ्गनानां देशत्यागः परमकृतिभिः कृष्णसारैरकारि। तासामेवस्तनयुगजिताः कुम्भिनः सन्तिमत्ताः प्रायोमूर्खः

किमपीत्यर्थः। प्रत्युत दुःखजनकतां साधयति, यद्दत्यादिव्यक्ताप्रायम्। पवनं स्यात् पात्रपाकार्थं कुम्भकाराणां गर्त्तभेदः पुरुन इतिख्यातः। पवनं कुम्भकारस्य पाकस्थाने नपुंसकम्। निम्बात् मरुतोः पुंसीतिमेदिनिः। चन्दनेति, चदिआह्लादने दीप्तौ चेत्यतोयुट। बाध इत्यामन्त्रयपदस्याविद्यमत्वेऽपि आषाढ़ति पूर्व्वतरपदमाश्रित्यते इत्यादेशः॥१६॥

दृष्ट्वेत्यादि। कृष्णः सारो येषां तैः कृष्णपरायणैः। वङ्कवाराङ्गनानाम् ङखनखेत्यादिना दण्डके वगिगत्यर्थः वङ्कं गमनं वारयन्ति दर्शनालापनादिना ताद्दशीनामङ्गनानां नयनयोः सुषमामुत्कृष्टां कान्तिम् आयासोव्यामोहस्तत् कारिणीं दृष्ट्वा ज्ञात्वा तद्विशिष्टदेशत्यागः कृतः। आस्तुतावदालापसम्भोगादिव्यापारो लोचनचातुरीमेव व्यामोहसम्पादिकांसम्भाव्य तपोवनं गतमित्यर्थः। तासामेव स्त्रीणां स्तनयुगजिताः सम्भोगवशीकृताः कुम्भिनः सन्ति, कुम्भी वेश्याकामुकस्तद्विशिष्टा असत् संसर्गिण इत्यर्थः। अत्रार्थान्तरन्यासमाह मत्तादत्यादि अमूर्खः पण्डितः प्रायः परिभवविधौपरिनिश्याद्यमानात्माभिभवविधौ अभिमानं ज्ञानं तनोति नमत्ता भर्खादिति तस्मात् असत्संसर्गपरिहारे पाण्डित्येनावश्यमेव यतनीयमित्युपदिष्टम्।

परिभवविधौनाभिमानं तनोति ॥ १७ ॥
अपूर्व्वोदृश्यते वह्निःकामिन्याःस्तनमण्ड-
ले। दूरतोदहते गात्रं हृदिलग्नस्तु शी-
तलः॥ १८ ॥ कथमेतत् कुचद्वन्द्वं पतितं

[-अमूर्ख इत्येकवचनेन विरलत्वं मत्ताइति बहुवचनेनाविरलत्व मप्यपीपदत्। सुषमापरमा शोभेत्यमरः। अभिमानोऽर्थादि दर्पे ज्ञाने प्रणयहिंसयोरित्यपि। कुम्भोवारस्त्रियाः कान्ते रक्षो-राशिप्रभेदयोरिति पुरुषोत्तमः॥ १७॥

अपूर्व्वइत्यादि। कश्चिज्जितेन्द्रियः कांश्चित् कामजयोपाय-मुपदिशति। कामिन्याः स्त्रियाः मण्डलेनस्त न तिष्ठत कुत-इत्याह यतोऽयं दुःपरितापकोऽपूर्वः अद्भुतो वह्निर्दृश्यते कीदृक् शीतलः शीतोऽलसोजडइति यावत्। भावप्रधान निर्देशाच्छै-त्यार्थः तल्लाति ददाति जाड्यकदित्यर्थः। वह्नेः शीतलत्वं विरु-द्धमित्यपूर्वत्वमेव तथा हृत् जहर्त्ति प्रसह्यकरोति इति किप् हृप्रसह्यकरणे जुहोत्यादिः। तथा इलग्नः औ कामे सक्तः। अतएतेनोपायेन इगात्रं कामशरीरं दहत कामं जय-तेत्यर्थः। एतेन कामस्य प्रधानसामग्रीभूतकामिनीसंसर्ग परित्यागादेव जयः सुकरइति। तथाच प्रवोधचन्द्रोदये चन्द्र-श्चन्दनकिन्दधामधवला रात्रिर्द्विरेफावली झङ्कारोन्मुखरा वि-लास विपिनः प्रान्तोवसन्तोत्सवः। सान्द्रध्यानघनोदयाश्च दि-वसा मन्दाः कदम्बानिलाः शृङ्गारप्रमुखाश्चकामसुहृदोनार्य्या जितायां जिताः॥ १८॥

कथमित्यादि। कश्चित् कञ्चित् कलहायमानं हितोपदे-शद्वारा शिक्षयति। हे त हे शठक कथंइन्द्वं कलहः पतितमुप

तवसुन्दरि । पश्याधस्खननान्मूढ़पतन्ति गिरयोऽपिच ॥ १९ ॥ कुसुमे कुसुमोत्पत्तिः श्रूयते नच दृश्यते । बाले तव

स्थितं तवोत शपः ॥ कुच कलहात् सङ्कुचितोभव कलहं दूरयेत्यर्थः, कुतइत्याह, एतद्दनहम् अधः परकाले खननात् पीड़नाद्दग्धमग्निं पश्य जानीहि इयेत्तानवचनत्वात् । एतत् कलहजन्यापूर्वं परलोकेऽग्निरिवतप्युप्रतीत्यर्थः किम्भूतं दरि साधूनां भयजनकम् । ननु परलोकाभावे कुतएतच्छङ्केत्याशङ्कामुन्मूलयति । हेमूढ गिरयो महान्तोऽपि पतन्ति किं पुनस्त्वमल्पक इति, खननात् कालेन खननादित्यत्वान्वेतव्यं वा । तथाच न केपि स्थातारः सुरगिरिपयोधिप्रभृतय इति शान्तिशतके । तकारस्तस्करे गर्भे क्रोड़े पुच्छे तथा शठे इति कोषान्तरम्। दनहं कलहयुग्मयोरित्यमरः । देवभेदेऽनलेरश्मौ यज्ञरत्नेधनेष्विति च । अधइति पूर्व्वाधरयोरसिश्च पुरधौचेति सद्यश्चाद्यत्वात् साधुरिति । दरीति दृभये घटादिः दरयतीति णिम् दर शब्दाङ्गयार्थान्मन्त्वर्थीयो वा जन्यतासम्बन्धेनान्वयः ॥१९॥

कुसुमइत्यादि । कश्चिद्भगवतीं प्रार्थयते । हे कुसुमे भक्तप्रतिपादितपुष्पविशिष्टे तवकुसुमोत्पत्तिः श्रूयते कुसुमपदं यन्त्रोपलक्षणं तत्र तवोत्पत्तिर्भूलयोगेन श्रूयते तथाच जन्मस्थानं महायन्त्रमित्यादि तन्त्रेष्वनुसन्धेयं तवइन्दीलक्ष्मीःशोभा कथं न दृश्यते अतो बाले शिशौमयि दयमेतत् सन्तापस्यगमनं वर वारय प्रत्यक्षरूपाभवेति प्रार्थना। हे मुखाम्भोजे इति सम्बोधनान्तरं मुखमम्भोजं पद्मं यस्याः हे पद्ममुखीत्यर्थः । यद्वा मुखानि दानवसम्बन्धीनि अम्भोजानिव यस्याः तस्मालाधार-

मुखाम्भोजे कथमिन्दीवरद्वयम् ॥२०॥ अयि मन्मथचूतमञ्जरि श्रवणायतचारुलोचने । अपहृत्यमनः क्वयासि तत् किमराजकम-त्रराजते ॥ २१ ॥ कोपस्त्वयाहृदिकृतो

स्यात् । किंवा मुखेनन्तादौ अम्भोजश्चन्द्रो विन्दुरूपोयस्याः मन्त्रादेर्नादयुक्तत्वात् । अथवामुखं मुखस्थानीयोऽम्भोजोऽर्द्ध-चन्द्रोनादव्यपदेशोयस्याः अस्य च रहस्यं गुरूपदेशतोऽवगन्तव्यं नेहप्रतन्यतेऽप्रकाश्यत्वात् । अब्जशब्दवत्प्रतिसंस्कारेणाम्भोज-शब्दस्यापि चन्द्रवाचकत्वम् । इन्दिरेन्दीरमालक्ष्मीरिति त्रिकाण्डशेषः । द्वयमिति दुङ्उपतापेसम्पदादित्वाद्भावेक्विप् । तस्या अयोगमनम् इणधातोरत्र बालेइतिषष्ठ्यर्थेसप्तमी ॥२० ॥

अयिइत्यादि । कश्चिद्विषयासक्तं चित्तमाक्षिपति । अयि-मनस्तत् आजकं न जायत इत्यजः परमात्माब्रह्मरूपस्तत् सम्ब-न्धिकं सुखं अपहृत्य विहायक्वयासि । सम्बोधनत्रयमाह मन्मथः कामएव चूतवृक्षस्तस्य मञ्जरि मञ्जरीशब्देनात्र जन्यत्वेन बीजं लक्ष्यते चूतपदं फलवाचकं वा कामबीजेत्यर्थः कामस्य मनोजत्वात् । हे श्रवणायत श्रवणादयत अनिरुक्त यमउपरमे क्तः । हे चारुलोचनेऽर गमनकारक । अथवा आयणादयत मनिवर्त्तनं भावे क्तः, चारुरमणीयं यस्य इत्येकं पदं नपुंसक सम्बोधने पक्षेगुणाभावः आद्येन सम्बोधनेन कामरसानुसारित्वं द्वितीयेन श्रोतव्यान्तरानुसारित्वं, तृतीयेन रूपानुसारित्वञ्च प्रत्यपादि, ततः किंकर्त्तव्यमित्याह अत्रआजके अस्य ब्रह्मसम्ब-न्धिसुखस्य षष्ठ्यर्थेसप्तमी, ते विस्तराय राज शोभस्व, ते इति तायृसन्तानपालनयोः भावेक्विप् लोर्व्यञ्जनइति यलोपः तत आधातो रित्याकारलोपः विस्तारयितुमित्यर्थः ॥ २१ ॥

Digitized by Google

यदिपङ्कजाक्षि, सोऽस्तु प्रियस्तवकिमत्र विधेयमन्यत्। आश्लेषमर्पय मदर्पितपूर्व्व मुच्चैर्दन्तक्षतं ममसमर्पयचुम्बनञ्च।।२२॥

इति महाकवि श्रीकालिदासविरचितं शृङ्गारतिलकं समाप्तम्॥

कोपइत्यादि। कश्चिन्निर्व्विर्ण्णो लक्ष्मीमाचिष्टे। हे पङ्कजाक्षि। पङ्कजाक्षः पुण्डरीको विष्णुस्तत्पत्नि हे लक्ष्मीरित्यर्थः। यदि त्वया कोपोऽच्छादिततस्तदा मम स प्रियो ममाभिलषितोऽस्तु अत्रान्यत्तव किं विधेयं त्वया किं विधातुं शक्यं वाकर्त्तरि क्षत्यइति कर्त्तरि षष्ठी। अर्पितपूर्वं मयि पूर्व्वमाहितं आश्लेषं सम्यक् मत् मां विहाय,यत्लोपेपञ्चमी अन्यत्रार्पय तथा मम मत्कर्त्तृकं चुम्बनं पल्लवयाहितं धूर्त्तांवा अन्यत्र समर्पय भियोऽत्रले पैनैव तदाश्रयणात्, चुविधातुरत्र धूर्त्तक्रियायां अतश्चुम्बको धूर्त्त उच्यते, तथाच मेदिनिकरः। चुम्बकश्चुम्बनपरे धूर्त्ताय स्कान्तयोरपि इति। किम्भूतं तदुभयं दन्तक्षतं दन्तःसानुपर्वतस्य नमभूमिः अत्रतद्गमने लक्षणा तस्यक्षतं क्षतिर्यस्मात् तपोवनगमनव्याघातमित्यर्थः। दन्तोनिकुञ्जे दशने दन्तः सानुनिकथ्यतइतिधरणिः॥ २२॥

शृङ्गं प्राधान्यमियर्त्तीत्यणिशृङ्गारप्रधानभूतस्तस्य तिलकमिव तिलकम् अलङ्काररूपमित्यर्थः। शृङ्गं प्राधान्य सान्वोरित्यमरः।

इति वैद्यमहामहोपाध्याय श्रीमत्कविराजचन्द्र विरचित शृङ्गारतिलकटीका सम्पूर्णा।

Digitized by Google

Digitized by Google

# विज्ञापनम् ।

| संस्कृतम् । | रु० | आ० |
|---|---|---|
| चक्रदत्तः | २ | ८ |
| सूर्यसिद्धान्तः | १ | ८ |
| भाषापरिच्छेदः | १ | ० |
| शिशुपालवधम् | ६ | ० |
| मुक्तिकोपनिषत् | ० | २ |
| मेघदूतम् | ० | ८ |
| रघुवंशम् | २ | ० |
| कुमारसम्भवम् | ० | ८ |
| नलोदयः | ० | १० |
| ऋतुसंहारः | ० | ६ |
| चरकसंहिता, १म खण्डम् | १ | ८ |
| किरातार्ज्जुनीयम् | २ | ८ |
| पूर्व्वनैषध चरितम् १।२य खण्ड | १ | १४ |
| श्रीमद्भगवद्गीता | ६ | ० |
| वेणीसंहारः | १ | ० |
| सुश्रुतः आयुर्वेदः | ४ | ० |
| विवेकचूड़ामणिः | ० | ६ |
| उत्तरकुमारसम्भवम् | ० | ६ |
| साहित्यदर्पणः | १ | ८ |
| किरातार्ज्जुनीयम्, मूलमात्रम् | ० | ६ |
| दशकुमारचरितम्, पूर्व्वोत्तरखण्डद्वयम् | १ | २ |
| वसन्ततिलकभाणः | ० | ६ |
| धातुमञ्जरी, | ० | १२ |
| गीतगोविन्दराधाविनोद, | ० | १० |
| अभिज्ञानशाकुन्तलम् | ० | १२ |
| सूर्य्यशतकम् | ० | २ |

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

This book should be returned to the Library on or before the last date stamped below.

A fine of five cents a day is incurred by retaining it beyond the specified time.

Please return promptly.

WIDENER
BOOK DUE
1985
CANCELLED
MAR 21 1985

Digitized by Google

IndL 1501.14
Widener Library 003382652
3 2044 092 179 936
Digitized by Google